**महर्षिवंशानुकीर्तनम्-2**

वैशंपायन उवाच

1. ब्रह्मणोमानसःपुत्राः विदिताःषण्महर्षयः।
एकादशसुताः स्थाणोः ख्याताः परमतेजसः॥

2. मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः।
अजैकपादहिर्बुध्न्यः पिनाकी च परंतपः॥

3. दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः।
स्थाणुर्भवश्च भगवान् रुद्रा एकादशस्मृताः॥

4. मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहःक्रतुः।
षडेते ब्रह्मणःपुत्रा वीर्यवन्तो महर्षयः॥

5. त्रयस्त्वङ्गिरसःपुत्राः लोके सर्वत्र विश्रुताः।
बृहस्पतिरुतथ्यश्च संवर्तश्च धृतव्रताः॥

6. अत्रेस्तु बहवःपुत्राः श्रूयन्ते मनुजाधिप।
सर्वे वेदविदःसिद्धाः शान्तात्मानो महर्षयः॥

7. राक्षसाश्च पुलस्त्यस्य वानराःकिन्नरास्तथा।
यक्षाश्च मनुजव्याघ्र पुत्रास्तस्य च धीमतः॥

8. पुलहस्य सुता राजन् शरभाश्च प्रकीर्तिताः।
सिंहाः किंपुरुषा व्याघ्रा ऋक्षा ईहामृगस्तथा.॥

9.क्रतोः क्रतुसमाः पुत्राः पतङ्गसहचारिणः।
विश्रुतास्त्रिषु लोकेषु सत्यव्रतपरायणाः॥

10. दक्षस्त्वजायताङ्गुष्ठाद् दक्षिणाद् भगवानृषिः।
ब्रह्मणः पृथिवीपाल शान्तात्मा सुमहातपाः॥

11. वामादजायताङ्गुष्ठाद् भार्या तस्य महात्मनः।
तस्यां पञ्चशतं कन्याः स एवाजनयन्मुनिः॥

12. ताः सर्वास्त्वनवद्याङ्ग्यः कन्याः कमललोचनाः।
पुत्रिकाःस्थापयामास नष्टपुत्रः प्रजापतिः॥

13. ददौ स दश धर्माय सप्तविंशतिमिन्दवे।
दिव्येन विधिना राजन् कश्यपाय त्रयोदश॥

14. नामतो धर्मपत्न्यस्ताः कीर्त्यमाना निबोध मे।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा॥

15.बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश।
द्वाराण्येतानि धर्मस्य विहितानि स्वयंभुवा॥

16. सप्तविंशति सोमस्य पत्न्यो लोकस्य विश्रुताः।
कालस्य नयने युक्ताः सोमपत्न्यः शुचिव्रताः॥

17. सर्वा नक्षत्रयोगिन्यो लोकयात्राविधानतः।
पैतामहो मुनिर्देवस्तस्यपुत्रः प्रजापतिः।
तस्याष्टौ वसवःपुत्रास्तेषां वक्ष्यामि विस्तरम्॥

18.धरो धृवश्च सोमश्च अहश्चैवानिलोनलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः॥

20.धूम्रायास्तु धरःपुत्रो ब्रह्मविद्यो धृवस्तथा।
चंद्रमास्तु मनस्विन्याः श्वासायाः श्वसनस्तथा॥

21. रतायाश्चाप्यहःपुत्रः शाण्डिल्याश्च हुताशनः।
प्रत्यूषश्च प्रभासश्च प्रभातायाः सुतौस्मृतौ॥

22. धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा।
धृवस्य पुत्रो भगवान् कालो लोकप्रकालनः॥

23. सोमस्य तु सुतो वर्चा वर्चस्वी येन जायते।
मनोहरायाःशिशिरः प्राणोऽथ रमणस्तथा॥

24. अहनः सुतस्तथा ज्योतिः शमःशान्तस्तथा मुनिः।
अग्नेःपुत्रः कुमारस्तु श्रीमाञ्छरवणालयः॥

25. तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः।
कृत्तिकाभ्युपपत्तेश्च कार्तिकेय इति स्मृतः॥

26. अनिलस्य शिवा भार्या तस्याःपुत्रो मनोजवः।
अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्यतु॥

27. प्रत्यूषस्य विदुःपुत्रं ऋषिं नाम्नाथ देवलम्।
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ॥

28. बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मवादिनी।
योगसक्ता जगत् कृत्स्नमसक्ता विचचार ह।
प्रभासस्य तु भार्या सा वसूनामष्टमस्य ह.॥

29. विश्वकर्मा महाभागो जज्ञे शिल्पप्रजापतिः।
कर्ता शिल्पसहस्राणां त्रिदशानां च वर्धकः॥

30. भूषणानां च सर्वेषां कर्ता शिल्पवतां वरः।
यो दिव्यानि विमानानि त्रिदशानां चकार ह॥

31. मनुष्यश्चोपजीवन्ति यस्य शिल्पं महात्मनः।
पूजयन्ति च यं नित्यं विश्वकर्माणमव्ययम्॥

32. स्तनं तु दक्षिणं भित्वा ब्रह्मणो नरविग्रहः।
निःसृतो भगवान् धर्मः सर्वलोकसुखावहः॥

33. त्रयस्तस्य वराःपुत्राः सर्वभूतमनोहराः।
शमःकामश्च हर्षश्च तेजसा लोकधारिणः॥

34. कामस्य तु रतिर्भार्या शमस्य प्राप्तिरङ्गना।
नन्दा तु भार्या हर्षस्य यासु लोकाःप्रतिष्ठिताः॥

35. मरीचेः कश्यपःपुत्रः कश्यपस्य सुरासुराः।
जज्ञिरे नृपशार्दूल लोकानां प्रभवस्तु सः॥

36. त्वाष्ट्री तु सवितुर्भार्या वडवारूपधारिणी ।
असूयत महाभागा सान्तरिक्षेऽश्विनावुभौ॥

37. द्वादशैवादितेः पुत्राः शक्रमुख्या नराधिप।
तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिताः॥

38. त्रयस्त्रिंशत इत्येते देवास्तेषामहं तव।
अन्वयं संप्रवक्ष्यामि पक्षैश्च कुलतो गणान्॥

39. रुद्राणामपरःपक्षः साध्यानां मरुतां तथा।
वसूनां भार्गवं विद्यात् विश्वेदेवांस्तथैव च॥

40. वैनतेयस्तु गरुडो बलवानरुणस्तथा।
बृहस्पतिश्च भगवानादित्येष्वेव गण्यते॥

41. अश्विनौ गुह्यकान् विद्धि सर्वौषध्यस्तथा पशून्।
एते देवगणा राजन् कीर्तितास्तेऽनुपूर्वशः॥

42. यान् कीर्तयित्वा मनुजः सर्वपापैः प्रमुच्यते।
ब्रह्मणो हृदयं भित्वा निःसृतो भगवान् भृगुः॥

43. भृगोःपुत्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः।
त्रैलोक्यप्राणयात्रार्थं वर्षावर्षे भयाभये।
स्वयंभुवा नियुक्तःसन् भुवनं परिधावति॥

44. योगाचार्यो महाबुद्धिर्दैत्यानामभवद् गुरुः।
सुराणां चापि मेधावी ब्रह्मचारी यतव्रतः॥

45. तस्मिन् नियुक्ते विधिना योगक्षेमाय भार्गवे।
अन्यमुत्पादयामास पुत्रं भृगुरनिन्दितम्॥

46. च्यवनं दीप्ततमसं धर्मात्मानं यशस्विनम्।
यः स रोषाच्च्युतो गर्भान्मातृमोक्षाय भारत॥

47. आरुषी तु मनोः कन्या तस्य पत्नी मनीषिणः।
और्वस्तस्यां समभवत् उरूं भित्वा महायशाः॥

48. महातेजा महावीर्यो बाल एव गुणैर्युतः।
ऋचीकस्तस्य पुत्रस्तु जमदग्निस्तथोऽभवत्॥

49. जमदग्नेस्तु चत्वार आसन् पुत्रा महामनः।
रामस्तेषां जघन्योऽभूत् अजघन्यैर्गुणैर्युतः।
सर्वशस्त्रेषु कुशलः क्षत्रियान्तकरो वशी॥

50. और्वस्यासीत् पुत्रशतं जमदग्निपुरोगमम्।
तेषां पुत्रसहस्राणि बभूवुर्भुवि विस्तरः॥

51. द्वौ पुत्रौ ब्राह्मणस्त्वन्यौ ययोस्तिष्ठति लक्षणम्।
लोके धाता विधाता च यौ स्थितौ मनुना सह॥

52. तयोरेव स्वसा देवी लक्ष्मीः पद्मगृहा शुभा।
तस्यास्तु मानसाःपुत्रास्तुरगा व्योमचारिणः॥

53. वरुणस्य भार्या या ज्याष्ठा शुक्राद् देवी व्यजायत।
तस्याः पुत्रं बलं विद्धि सुरां च सुरनन्दिनीम्॥

54. प्रजानामन्नकामानां अन्योन्यपरिभक्षणात्।
अधर्मस्तत्र संजातः सर्वभूतविनाशकः॥

55. तस्यापि निर्ऋतिर्भार्या नैर्ऋता येन राक्षसाः।
घोरास्तस्यास्त्रयः पुत्राः पापकर्मरताः सदा॥

56. भयो महाभयश्चैव मृत्युर्भूतान्तकस्तथा।
न तस्य भार्या पुत्रो वा कश्चिदत्यन्तको हि सः॥

57. काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम्।
ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः॥

58. उलूकान् सुषुवे काकी श्येनी श्येनान् व्यजायत।
भासी भासानजनयद् गृध्रांश्चैव जनाधिप॥

59. धृतराष्ट्री तु हंसश्च कलहंसांश्च सर्वशः।
चक्रवाकांश्च भद्रा तु जनयामास सैव तु॥

60. शुकी च जनयामास शुकानेव यशस्विनी।
कल्याणगुणसंपन्ना सर्वलक्षणपूजिता॥

61.नव क्रोधवशा नारीः प्रजज्ञे क्रोधसंभवाः।
मृगी च मृगमन्दा च हरी भद्रमना अपि॥

62. मातङ्गी त्वथ शार्दूली श्वेता सुरभिरेव च।
सर्वलक्षणसंपन्ना सुरसा चैव भामिनी॥

63. अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम।
ऋक्षाश्च मृगमन्दायाः सृमराश्च परंतप॥

64. ततस्त्वैरावतं नागं जज्ञे भद्रमनाः सुतम्।
ऐरावतः सुतस्तस्या देवनागो महागजः॥

65. हर्याश्च हरयोऽपत्यं वानराश्च तरस्विनः।
गोलांगूलांश्च भद्रं ते हर्याः पुत्रान् प्रचक्षते॥

66. प्रजज्ञे त्वथ शार्दूली सिंहान् व्याघ्रानन्नेकशः।
द्वीपिनश्च महासत्त्वान् सर्वानेव न संशयः॥

67. मातङ्ग्यपि च मातङ्गान् अपत्यानि नराधिप।
दिशां गजं तु श्वेताख्यं श्वेताजनयदाशुगम्॥

68. तथा दुहितरौ राजन् सुरभिर्वै व्यजायत।
रोहिणी चैव भद्रं ते गन्धर्वी तु यशस्विनी॥

69. विमलामपि भद्रं ते अनलामपि भारत।
रोहिण्यां जज्ञिरे गावो गन्धर्व्यां वाजिनः सुताः॥
सप्त पिण्डफलान् वृक्षान् अनलापि व्यजायत॥

70.अनलायाः शुकी पुत्री कङ्कस्तु सुरसासुतः।
अरुणस्य भार्या श्येनी तु वीर्यवन्तौ महाबलौ॥

71.सम्पातिं जनयामास वीर्यवन्तं जटायुषम्।
सुरसाजनयन्नागान् कद्रूः पुत्रांस्तु पन्नगान्॥

72. द्वौ पुत्रौ विनतायास्तु विख्यातौ गरुडारुणौ।
सुरसाजनयत् सर्पान् शतमेकशिरोधरान्॥

73. सुरसाकन्यका जातास्तिस्रः कमललोचनाः।
वनस्पतीनां वृक्षाणां वीरुधां चैव मातरः॥

74. अनला रुहा द्वे प्रोक्ते वीरुधां चैव ताः स्मृताः।
गृह्णन्ति ये विना पुष्पं फलानि तरवः पृथक्॥

75. अनलासुतास्ते विज्ञेयाः तानेवाहुर्वनस्पतीन्।
पुष्पैः फलग्रहान् वृक्षान् रुहायाः प्रसवान् विभो॥

76. लतागुल्मानिवल्यश्च त्वक्सारतृणजातयः।
वीरुधायाःप्रजास्ताः स्युरत्र वंशः समाप्यते॥

77. इत्येष सर्वभूतानां महतां मनुजाधिप।
प्रभवः कीर्तितः सम्यङ्मया मतिमतां वर॥

78.यं श्रुत्वा पुरुषः सम्यङ्मुक्तो भवति पाप्मनः।
सर्वज्ञतां च लभते गतिमग्र्यां च विन्दति॥

इति श्रीमहाभारते आदिपर्वणि सम्भवपर्वणि षट्षष्टितमोऽध्यायः.
वैशंपायन उवाच
1. ब्रह्मणोमानसःपुत्राः विदिताःषण्महर्षयः।
एकादशसुताः स्थाणोः ख्याताः परमतेजसः॥

2. मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः।
अजैकपादहिर्बुध्न्यः पिनाकी च परंतपः॥

3. दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः।
स्थाणुर्भवश्च भगवान् रुद्रा एकादशस्मृताः॥

4. मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहःक्रतुः।
षडेते ब्रह्मणःपुत्रा वीर्यवन्तो महर्षयः॥

5. त्रयस्त्वङ्गिरसःपुत्राः लोके सर्वत्र विश्रुताः।
बृहस्पतिरुतथ्यश्च संवर्तश्च धृतव्रताः॥

6. अत्रेस्तु बहवःपुत्राः श्रूयन्ते मनुजाधिप।
सर्वे वेदविदःसिद्धाः शान्तात्मानो महर्षयः॥

7. राक्षसाश्च पुलस्त्यस्य वानराःकिन्नरास्तथा।
यक्षाश्च मनुजव्याघ्र पुत्रास्तस्य च धीमतः॥

8. पुलहस्य सुता राजन् शरभाश्च प्रकीर्तिताः।
सिंहाः किःपुरुषा व्याघ्रा ऋक्षा ईहामृगस्तथा.॥

9.क्रतोः क्रतुसमाः पुत्राः पतङ्गसहचारिणः।
विश्रुतास्त्रिषु लोकेषु सत्यव्रतपरायणाः॥

10. दक्षस्त्वजायताङ्गुष्ठाद् दक्षिणाद् भगवानृषिः।
ब्रह्मणः पृथिवीपाल शान्तात्मा सुमहातपाः॥

11. वामादजायताङ्गुष्ठाद् भार्या तस्य महात्मनः।
तस्यां पञ्चशतं कन्याः स एवाजनयन्मुनिः॥

12. ताः सर्वास्त्वनवद्याङ्ग्यः कन्याः कमललोचनाः।
पुत्रिकाःस्थापयामास नष्टपुत्रः प्रजापतिः॥

13. ददौ स दश धर्माय सप्तविंशतिमिन्दवे।
दिव्येन विधिना राजन् कश्यपाय त्रयोदश॥

14. नामतो धर्मपत्न्यस्ताः कीर्त्यमाना निबोध मे।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा॥

15.बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश।
द्वाराण्येतानि धर्मस्य विहितानि स्वयंभुवा॥

16. सप्तविंशति सोमस्य पत्न्यो लोकस्य विश्रुताः।
कालस्य नयने युक्ताः सोमपत्न्यः शुचिव्रताः॥

17. सर्वा नक्षत्रयोगिन्यो लोकयात्राविधानतः।
पैतामहो मुनिर्देवस्तस्यपुत्रः प्रजापतिः।
तस्याष्टौ वसवःपुत्रास्तेषां वक्ष्यामि विस्तरम्॥

18.धरो धृवश्च सोमश्च अहश्चैवानिलोनलः।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः॥

20.धूम्रायास्तु धरःपुत्रो ब्रह्मविद्यो धृवस्तथा।
चंद्रमास्तु मनस्विन्याः श्वासायाः श्वसनस्तथा॥

21. रतायाश्चाप्यहःपुत्रः शाण्डिल्याश्च हुताशनः।
प्रत्यूषश्च प्रभासश्च प्रभातायाः सुतौस्मृतौ॥

22. धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा।
धृवस्य पुत्रो भगवान् कालो लोकप्रकालनः॥

23. सोमस्य तु सुतो वर्चा वर्चस्वी येन जायते।
मनोहरायाःशिशिरः प्राणोऽथ रमणस्तथा॥

24. अह्नः सुतस्तथा ज्योतिः शमःशान्तस्तथा मुनिः।
अग्नेःपुत्रः कुमारस्तु श्रीमाञ्छरवणालयः॥

25. तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः।
कृत्तिकाभ्युपपत्तेश्च कार्तिकेय इति स्मृतः॥

26. अनिलस्य शिवा भार्या तस्याःपुत्रो मनोजवः।
अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्यतु॥

27. प्रत्यूषस्य विदुःपुत्रं ऋषिं नाम्नाथ देवलम्।
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ॥

28. बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मवादिनी।
योगसक्ता जगत् कृत्स्नमसक्ता विचचार ह।
प्रभासस्य तु भार्या सा वसूनामष्टमस्य ह.॥

29. विश्वकर्मा महाभागो जज्ञे शिल्पप्रजापतिः।
कर्ता शिल्पसहस्राणां त्रिदशानां च वर्धकः॥

30. भूषणानां च सर्वेषां कर्ता शिल्पवतां वरः।
यो दिव्यानि विमानानि त्रिदशानां चकार ह॥

31. मनुष्यश्चोपजीवन्ति यस्य शिल्पं महात्मनः।
पूजयन्ति च यं नित्यं विश्वकर्माणमव्ययम्॥

32. स्तनं तु दक्षिणं भित्वा ब्रह्मणो नरविग्रहः।
निःसृतो भगवान् धर्मः सर्वलोकसुखावहः॥

33. त्रयस्तस्य वराःपुत्राः सर्वभूतमनोहराः।
शमःकामश्च हर्षश्च तेजसा लोकधारिणः॥

34. कामस्य तु रतिर्भार्या शमस्य प्राप्तिरङ्गना।
नन्दा तु भार्या हर्षस्य यासु लोकाःप्रतिष्ठिताः॥

35. मरीचेः कश्यपःपुत्रः कश्यपस्य सुरासुराः।
जज्ञिरे नृपशार्दूल लोकानां प्रभवस्तु सः॥

36. त्वाष्ट्री तु सवितुर्भार्या वडवारूपधारिणी ।
असूयत महाभागा सान्तरिक्षेऽश्विनावुभौ॥

37. द्वादशैवादितेः पुत्राः शक्रमुख्या नराधिप।
तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिताः॥

38. त्रयस्त्रिंशत इत्येते देवास्तेषामहं तव।
अन्वयं संप्रवक्ष्यामि पक्षैश्च कुलतो गणान्॥

39. रुद्राणामपरःपक्षः साध्यानां मरुतां तथा।
वसूनां भार्गवं विद्यात् विश्वेदेवांस्तथैव च॥

40. वैनतेयस्तु गरुडो बलवानरुणस्तथा।
बृहस्पतिश्च भगवानादित्येष्वेव गण्यते॥

41. अश्विनौ गुह्यकान् विद्धि सर्वौषध्यस्तथा पशून्।
एते देवगणा राजन् कीर्तितास्तेऽनुपूर्वशः॥

42. यान् कीर्तयित्वा मनुजः सर्वपापैः प्रमुच्यते।
ब्रह्मणो हृदयं भित्वा निःसृतो भगवान् भृगुः॥

43. भृगोःपुत्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः।
त्रैलोक्यप्राणयात्रार्थं वर्षावर्षे भयाभये।
स्वयंभुवा नियुक्तःसन् भुवनं परिधावति॥

44. योगाचार्यो महाबुद्धिर्दैत्यानामभवद् गुरुः।
सुराणां चापि मेधावी ब्रह्मचारी यतव्रतः॥

45. तस्मिन् नियुक्ते विधिना योगक्षेमाय भार्गवे।
अन्यमुत्पादयामास पुत्रं भृगुरनिन्दितम्॥

46. च्यवनं दीप्ततमसं धर्मात्मानं यशस्विनम्।
यः स रोषाच्च्युतो गर्भान्मातृमोक्षाय भारत॥

47. आरुषी तु मनोः कन्या तस्य पत्नी मनीषिणः।
और्वस्तस्यां समभवत् उरूं भित्वा महायशाः॥

48. महातेजा महावीर्यो बाल एव गुणैर्युतः।
ऋचीकस्तस्य पुत्रस्तु जमदग्निस्तथोऽभवत्॥

49. जमदग्नेस्तु चत्वार आसन् पुत्रा महामनः।
रामस्तेषां जघन्योऽभूत् अजघन्यैर्गुणैर्युतः।
सर्वशस्त्रेषु कुशलः क्षत्रियान्तकरो वशी॥

50. और्वस्यासीत् पुत्रशतं जमदग्निपुरोगमम्।
तेषां पुत्रसहस्राणि बभूवुर्भुवि विस्तरः॥

51. द्वौ पुत्रौ ब्राह्मणस्त्वन्यौ ययोस्तिष्ठति लक्षणम्।
लोके धाता विधाता च यौ स्थितौ मनुना सह॥

52. तयोरेव स्वसा देवी लक्ष्मीः पद्मगृहा शुभा।
तस्यास्तु मानसाःपुत्रास्तुरगा व्योमचारिणः॥

53. वरुणस्य भार्या या ज्याष्ठा शुक्राद् देवी व्यजायत।
तस्याः पुत्रं बलं विद्धि सुरां च सुरनन्दिनीम्॥

54. प्रजानामन्नकामानां अन्योन्यपरिभक्षणात्।
अधर्मस्तत्र संजातः सर्वभूतविनाशकः॥

55. तस्यापि निर्ऋतिर्भार्या नैर्ऋता येन राक्षसाः।
घोरास्तस्यास्त्रयः पुत्राः पापकर्मरताः सदा॥

56. भयो महाभयश्चैव मृत्युर्भूतान्तकस्तथा।
न तस्य भार्या पुत्रो वा कश्चिदत्यन्तको हि सः॥

57. काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम्।
ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः॥

58. उलूकान् सुषुवे काकी श्येनी श्येनान् व्यजायत।
भासी भासानजनयद् गृध्रांश्चैव जनाधिप॥

59. धृतराष्ट्री तु हंसश्च कलहंसांश्च सर्वशः।
चक्रवाकांश्च भद्रा तु जनयामास सैव तु॥

60. शुकी च जनयामास शुकानेव यशस्विनी।
कल्याणगुणसंपन्ना सर्वलक्षणपूजिता॥

61.नव क्रोधवशा नारीः प्रजज्ञे क्रोधसंभवाः।
मृगी च मृगमन्दा च हरी भद्रमना अपि॥

62. मातङ्गी त्वथ शार्दूली श्वेता सुरभिरेव च।

सर्वलक्षणसंपन्ना सुरसा चैव भामिनी॥

63. अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम।
ऋक्षाश्च मृगमन्दायाः सृमराश्च परंतप॥

64. ततस्त्वैरावतं नागं जज्ञे भद्रमनाः सुतम्।
ऐरावतः सुतस्तस्या देवनागो महागजः॥

65. हर्याश्च हरयोऽपत्यं वानराश्च तरस्विनः।
गोलांगूलांश्च भद्रं ते हर्याः पुत्रान् प्रचक्षते॥

66. प्रजज्ञे त्वथ शार्दूली सिंहान् व्याघ्रानेकशः।
द्वीपिनश्च महासत्त्वान् सर्वानेव न संशयः॥

67. मातङ्ग्यपि च मातङ्गान् अपत्यानि नराधिप।
दिशां गजं तु श्वेताख्यं श्वेताजनयदाशुगम्॥

68. तथा दुहितरौ राजन् सुरभिर्वै व्यजायत।
रोहिणी चैव भद्रं ते गन्धर्वी तु यशस्विनी॥

69. विमलामपि भद्रं ते अनलामपि भारत।
रोहिण्यां जज्ञिरे गावो गन्धर्व्यां वाजिनः सुताः॥
सप्त पिण्डफलान् वृक्षान् अनलापि व्यजायत॥

70.अनलायाः शुकी पुत्री कङ्कस्तु सुरसासुतः।
अरुणस्य भार्या श्येनी तु वीर्यवन्तौ महाबलौ॥

71.सम्पातिं जनयामास वीर्यवन्तं जटायुषम्।
सुरसाजनयन्नागान् कद्रूः पुत्रांस्तु पन्नगान्॥

72. द्वौ पुत्रौ विनतायास्तु विख्यातौ गरुडारुणौ।
सुरसाजनयत् सर्पान् शतमेकशिरोधरान्॥

73. सुरसाकन्यका जातास्त्रिस्रः कमललोचनाः।
वनस्पतीनां वृक्षाणां वीरुधां चैव मातरः॥

74. अनला रुहा द्वे प्रोक्ते वीरुधां चैव ताः स्मृताः।

गृह्णन्ति ये विना पुष्पं फलानि तरवः पृथक्॥

75. अनलासुतास्ते विज्ञेयाः तानेवाहुर्वनस्पतीन्।
पुष्पैः फलग्रहान् वृक्षान् रुहायाः प्रसवान् विभो॥

76. लतागुल्मानिवल्यश्च त्वक्सारतृणजातयः।
वीरुधायाःप्रजास्ताः स्युरत्र वंशः समाप्यते॥

77. इत्येष सर्वभूतानां महतां मनुजाधिप।
प्रभवः कीर्तितः सम्यङ्मया मतिमतां वर॥

78.यं श्रुत्वा पुरुषः सम्यङ्मुक्तो भवति पाप्मनः।
सर्वज्ञतां च लभते गतिमग्र्यां च विन्दति॥

इति श्रीमहाभारते आदिपर्वणि सम्भवपर्वणि षट्षष्टितमोऽध्यायः.